# Sundararaja Ashtottarashatanama Stotram

# સુન્દરરાજાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Sundararaja Ashtottarashatanamastotram

File name : sundararAjAShTottarashatanAmastotram.itx

Category : deities_misc, aShTottarashatanAma, stotra

Location : doc_deities_misc

Proofread by : Saritha Sangameswaran

Latest update : May 27, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 27, 2026

*sanskritdocuments.org*

# સુન્દરરાજાષ્ટોત્તરશતનામસ્તોત્રમ્

॥ શ્રીરસ્તુ ॥

॥ ૐ શ્રીસુન્દરરાજપરબ્રહ્મણે નમઃ ॥

॥ અથ શ્રીમત્સુન્દરરાજાષ્ટોત્તરશતનામસ્તોત્રપ્રારમ્ભઃ ॥

શ્રીમદ્વૃષભશૈલેન્દ્રનિત્યવાસકૃતાદરમ્ ।
શ્રીનિવાસાચ્યુતાનન્તગોવિન્દાદ્યયુતાભિધમ્ ॥ ૧॥

દિવ્યૌષધીવૃતાऽરામવનાચલનિકેતનમ્ ।
પારમ્યસામ્યવિરમપરમસ્વામિસંજ્ઞકમ્ ॥ ૨॥

સર્વલોકૈકસૌન્દર્યભવનીકૃતવિગ્રહમ્ ।
વૈકર્તનતપોયોગપ્રેમપુણ્યફલોદયમ્ ॥ ૩॥

પ્રદીપપાદપપ્રાન્તસોમચ્છન્દરથસ્થિતમ્ ।
સુપર્ણદ્વયસઞ્જુષ્ટસુપર્ણવિજયધ્વજમ્ ॥ ૪॥

સ્વમઞ્જીરગલત્પુણ્યમઞ્જીરતટિનીસ્થિતમ્ ।
સહસ્રદલપદ્મસ્થસહસ્રદલપદ્યુગમ્ ॥ ૫॥

રમા વિશ્વમ્ભરાશ્લિષ્ટપાર્શ્વદ્વન્દ્વમનોહરમ્ ।
સુતપાનામવિપ્રેન્દ્રચાતકામ્બુદમણ્ડલમ્ ॥ ૬॥

દુર્વાસશ્શાપનિર્મુક્તમણ્ડૂકમુનિપૂજિતમ્ ।
પર્વતધ્વજપાણ્ડ્યેન્દ્રપરાર્થપદપઙ્કજમ્ ॥ ૭॥

વિમાનવામપાર્શ્વસ્થક્ષેત્રપાલનિષેવિતમ્ ।
શ્રીમત્સુન્દરરાજાખ્યયાથાર્થ્યદ્યોતિતાऽકૃતિમ્ ॥ ૮॥

તપ્તકાઞ્ચનસઙ્કાશચારુપીતામ્બરાવૃતમ્ ।
સજીવ દિવ્યશસ્ત્રાસ્ત્રસમારૂઢકટીતટમ્ ॥ ૯॥

નીલનીરદમધ્યસ્થતટિદાભોપવીતિનમ્ ।
ભાર્ગવીભવનામ્ભોજભવનીકૃતવક્ષસમ્ ॥ ૧૦॥

ભ્રમદ્ભમરસઙ્ઘુષ્ટવનમાલાવિભૂષિતમ્ ।
શ્રીકૌસ્તુભમહારત્નપરિશોભિતકન્ધરમ્ ॥ ૧૧॥

મન્દારવિટપાકારબાહુદણ્ડોપશોભિતમ્ ।
શઙ્ખચક્રગદાખડ્ગશાર્ઙ્ગચાપવરાયુધમ્ ॥ ૧૨॥

ઉદ્યોગચક્રવિલસદ્વામેતરકરામ્બુજમ્ ।
નિનદદ્દક્ષિણાવર્તદક્ષિણેતરપાણિનમ્ ॥ ૧૩॥

અશેષલોકવરદ કટિન્યસ્તકરદ્વયમ્ ।
દોર્દણ્ડષણ્ડમધ્યસ્થતારહારલતાન્વિતમ્ ॥ ૧૪॥

પદ્મચન્દ્રામૃતરસપ્રબુદ્ધમુખમણ્ડલમ્ ।
જપાકુસુમસઙ્કાશવિદ્રુમાધરપલ્લવમ્ ॥ ૧૫॥

નિતાન્તદીર્ઘલલિતશફરદ્વન્દ્વલોચનમ્ ।
નયનામ્બુધિમધ્યસ્થસેતુભૂતસુનાસિકમ્ ॥ ૧૬॥

મનોભવમહેષ્વાસનમિતભ્રયુગોજ્વલમ્ ।
ફુલ્લપઙ્કેરુહાસીનમધુપાયિતપુણ્ડ્રકમ્ ॥ ૧૭॥

અર્ધેન્દુલલિતોદારફાલસ્થલમનોહરમ્ ।
અરાળનીલતરળમઞ્જુળાળકમઞ્જુળમ્ ॥ ૧૮॥

સ્મિતજ્યોત્સ્નાપરીબાહમજ્જન્નીલાચલદ્યુતિમ્ ।
બાલાર્કશતસાહસ્રકિરીટમકુટાન્વિતમ્ ॥ ૧૯॥

દેદીપ્યમાનકટકકુણ્ડલાઙ્ગદભાસુરમ્ ।
નાનામણિગણજ્વાલાશવળીકૃત વિગ્રહમ્ ॥ ૨૦॥

શ્રીમત્કલ્યાણસૌન્દર્યવલ્લીચિત્તાનુવર્તિનમ્ ।
વેદવેદાઙ્ગતત્વજ્ઞ વિશુદ્ધમતિગોચરમ્ ॥ ૨૧॥

શરણાગતસન્ત્રાણકરુણાવરુણાલયમ્ ।
દુર્વારાશ્રિતદારિદ્યવિલેશયખગેશ્વરમ્ ॥ ૨૨॥

પાદાનનજાક્ષ્યાદિસર્વાવયવસુન્દરમ્ ।
સ્વારાધનાસક્તચિત્તભક્તસંરક્ષણોત્સુકમ્ ॥ ૨૩॥

વિખનોમુનિસિદ્ધાન્તસમર્ચૈકપ્રિયાશયમ્ ।
પ્રણતાર્તિપ્રણાશૈકધુરન્ધરવનાદ્રિગમ્ ॥ ૨૪॥

ધારાધરાવૃતાઽરામધરાધરધરાધરમ્ ।
અકારાદિક્ષકારાન્તમાતૃકાતારકાત્મકમ્ ॥ ૨૫॥

ધ્રુવચન્દ્રદિવાનાથમધ્યમણ્ડલવર્તિનમ્ ।
નારદવ્યાસસનકશુકાદિહૃદયેશયમ્ ॥ ૨૬॥

દેવદાનવગન્ધર્વસિદ્ધસઙ્ઘાભિવન્દિતમ્ ।
અનુક્ષણસમારૂઢલક્ષ્મીસંજ્ઞાવિરાજિતમ્ ॥ ૨૭॥

અનેકાચરસઞ્ચારભુવનાગારશિલ્પિનમ્ ।
બ્રહ્મરુદ્રેન્દ્રસઙ્ઘુષ્ટમહાવિભવવિસ્તરમ્ ॥ ૨૮॥

પારાવારવિહારોદ્યન્મહામત્સ્યાવતારિણમ્ ।
મધુકૈટભદાવાગ્નિપ્રશમપ્રચરામ્બુદમ્ ॥ ૨૯॥

સંવર્તસલિલાઽવર્તસમુદ્ધૃતસરસ્વતિમ્ ।
અશેષભુવનાઽધારધરણીધરધારિણમ્ ॥ ૩૦॥

ક્ષીરાબ્ધિમન્થનીમન્થમન્દરાઽધારકચ્છપમ્ ।
સાગરોત્પાદિતાબ્જાઽદિગજરામામણિદ્રુમમ્ ॥ ૩૧॥

સુધાહેતુકદૈત્યારિદૈત્યોગ્રકલહાસ્પદમ્ ।
મોહિતાશેષભુવન મોહિનીરૂપધારિણમ્ ॥ ૩૨॥

ધુતસ્કન્ધસટાલગ્નનક્ષત્રગ્રહમણ્ડલમ્ ।
હિરણ્યાક્ષઘનધ્વાન્તકવળીકર ભાસ્કરમ્ ॥ ૩૩॥

સુરાસુરસુધાદાનપ્રિયવિપ્રિયકારિણમ્ ।
સૂકરાકારહુઙ્કારનિરાકૃત પરાકૃતિમ્ ॥ ૩૪॥

સ્વાઙ્કસંસ્થાપિતાનન્તાનન્તતત્વાર્થદર્શિનમ્ ।
શ્રીમદષ્ટાર્ણવિલસત્પ્રહ્લાદહૃદયાલયમ્ ॥ ૩૫॥

હિરણ્યસદનદ્વારનિર્ભિન્નસ્તમ્ભસમ્ભવમ્ ।
કઠોરગર્જનધ્યાન ભીતભીતજગત્રયમ્ ॥ ૩૬॥

ઘોરવજ્નખર વિભિન્નશરભાકૃતિમ્ ।

દૈત્યશ્રી હરણાસક્તકુહનાબ્રહ્મચારિણમ્ ॥ ૩૭॥

ત્રિવિક્રમક્રમાઽક્રાન્તસમસ્તભુવનક્રમમ્ ।
સર્વગીર્વાણસામન્તસાર્વભૌમસહોદરમ્ ॥ ૩૮॥

ભાર્ગવાર્ણવસમ્ભૂતનિષ્કળઙ્કનિશાકરમ્ ।
સ્વજોલવદન્દગ્ધકાર્તવીર્યમહાવનમ્ ॥ ૩૯॥

ક્ષત્રિયક્ષતજાક્તિતીક્ષ્ણધારાપરશ્વધમ્ ।
સૌરવંશસમુત્પન્નહરિન્મણિવરોત્તમમ્ ॥ ૪૦॥

મહાનટમહેષ્વાસભગ્નપ્રાપ્તજયશ્રિયમ્ ।
જાનકીચારુવદનચકોરશ શાલાઞ્ચનમ્ ॥ ૪૧॥

નિર્જિતાનેકસાહસ્રમીનકેતનસુન્દરમ્ ।
ઉદ્યદુત્ફુલ્લચન્દ્રાબ્જસ્ફુરન્નીલાચલોપમમ્ ॥ ૪૨॥

પ્રપન્નાપન્નસમ્પન્નકરણૈકપરાયણમ્ ।
શરશોષિતસર્વસ્વસમુદ્રતરણોદ્યતમ્ ॥ ૪૩॥

દુષ્ટેષ્ટાઽશરકીશેશનિગ્રહાનુગ્રહપ્રદમ્ ।
ભરતાઙ્ગદભલ્લૂકસૌરવાયુસુતાઽવૃતમ્ ॥ ૪૪॥

વસિષ્ઠવામદેવાદિબ્રહ્મર્ષિગણમાનિતમ્ ।
ક્ષમાવાત્સલ્યકારુણ્યાદ્યુદારગુણવારિધિમ્ ॥ ૪૫॥

શરદિન્દુસુધાશઙ્ખશુદ્ધ સ્ફટિકવિગ્રહમ્ ।
કોપાઽટોપહલાઽકૃષ્ટયમુનાહસ્તિનાપુરમ્ ॥ ૪૬॥

ગાન્ધારકર્ણગાઙ્ગેયસુયોધનમુખાર્ચિતમ્ ।
યશોદા દેવકીનન્દવસુદેવયશોદયમ્ ॥ ૪૭॥

ગોપીગોપાલગોબૃન્દગોવર્ધનધરોદ્ધરમ્ ॥

બૃન્દાવનાન્તવિહરદ્ગોપીનયન કિઙ્કરમ્ ॥ ૪૮॥

ચિન્તયન્તીકુચેલાદિચિન્તિતાર્થબહુપ્રદમ્ ।
તૃણીકૃતાશ્વવૃષભતૃણાઽવર્તમદોત્કટમ્ ॥ ૪૯॥

કાળીયકંસનરકબકવાણેશભઞ્જનમ્ ।
ક્રન્દત્પાઞ્ચાલતનયાદુઃખોન્મૂલનસમ્ભ્રમમ્ ॥ ૫૦॥

ઉદ્ધવાક્રૂરવિદુરભીષ્મપાણ્ડવસેવિતમ્ ।
રુક્મિણીસત્યભામાદિસ્ત્રૈણદૃષ્ટિમનોહરમ્ ॥ ૫૧॥

મહાભારતશાર્દૂલવિજયપ્રિયસારથિમ્ ।
ધનઞ્જયાદ્રિગીતાર્થસુધાવર્ષિમહાઘનમ્ ॥ ૫૨॥

સમસ્ત વિદ્યાભવનતુરઙ્ગમવરાનનમ્ ।
હેષાત્રયી મહાઘોષચન્દ્રમણ્ડલમન્દુરમ્ ॥ ૫૩॥

નિગમાઽગમશાસ્ત્રાદિસર્વવાગીશ્વરેશ્વરમ્ ।
સ્વાંશાવતારબાહુળ્યસંરક્ષિતજગત્ત્રયમ્ ॥ ૫૪॥

શ્રીમદાઽરામજીમૂતપ્રખ્યાતનગપુઙ્ગવમ્ ।
અણિમાદ્યષ્ટસંસિદ્ધ્યમાદ્યષ્ટાઙ્ગસિદ્ધિદમ્ ॥ ૫૫॥

શ્રીમદ્વૃષાદ્રિનિલયં શ્રીનિવાસાભિધાનકમ્ ।
નરનારાયણાઽખ્યાત હંસહંસોત્તમેશ્વરમ્ ॥ ૫૬॥

શ્રીમમદ્વૃષાદ્રિનિલયં શ્રીમદ્વેઙ્કટનાયકમ્ ।
શ્રીમત્કુઞ્જરરાજેન્દ્રવરદં પ્રણમામ્યહમ્ ॥ ૫૭॥

સમસ્તજગદાધારં સર્વમઙ્ગળદાયકમ્ ।
સર્વલોકૈકશરણં વરદં પ્રણમામ્યહમ્ ॥ ૫૮॥

સર્વારિષ્ટવિનાશાર્થં સર્વઽપદ્વિનિવૃત્તયે ।
શ્રીવિષ્ણુભક્તિલાભાય માયાસન્તારણાય ચ ॥ ૫૯॥

સર્વસમ્પત્સમૃધ્યર્થમાધુરારોગ્યવૃદ્ધયે ।
સત્કળત્રગૃહક્ષેત્ર પુત્રમિત્રાદિવૃદ્ધયે ॥ ૬૦॥

સુન્દરં પરમન્દેવં દેવીં કલ્યાણસુન્દરીમ્ ।
નમામિ ભૂયોભૂયોઽહમ્ભૂયોભૂયો નમામ્યહમ્ ॥ ૬૧॥

ઇતિ સ્તુત્વા દિને રાત્રૌ સર્વસિદ્ધિં લભેન્નરઃ ॥ ૬૨॥

ઇતિ શ્રીમત્સુન્દરરાજાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમિતિશમ્ ॥

Proofread by Saritha Sangameswaran

*Sundararaja Ashtottarashatanama Stotram*

pdf was typeset on May 27, 2026

Please send corrections to *sanskrit@cheerful.com*